बभूव सुप्रजा साध्वी ईश्वरी भुवनेश्वरी।
व्रतस्यास्य प्रभावेन सुपुत्रा त्वञ्च देवकि ! ॥
भविष्यसि त्रिलोकेशं पुत्रञ्च जनयिष्यसि।
इत्येवं श्रावयित्वा च विरराम मुनिस्तदा ॥
जगाम स्वपुरं पार्थ मयाप्येवं तवोदितम्।
याः स्त्रियः स्वाचरिष्यन्ति व्रतमेतद्युधिष्ठिर ॥
कुक्कुटाख्यं श्रवङ्गाख्यं देवक्याचरितं शुभम्।
तासां सन्ततिविच्छेदो न कदाचिद्भविष्यति ॥
स्त्रियश्चैवाचरिष्यन्ति व्रतमेतत् सुखप्रदम्।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति शिवमन्दि-
रम् ॥

या कुक्कुटीव्रतमिदं श्रवणीयमेतं
देवं विभाव्य हृदये च गुरुं निधाय।
भक्त्या करोति कलुषौघविघातदक्षं
साध्वी सदा भवति शोभनजीववत्सा ॥"
इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता ॥

लवं, क्ली, ( लू + अप्। ) जातीफलम्। इति शब्दचन्द्रिका ॥ लवङ्गम्। लामज्जकम्। ईषत्। इति राजनिर्घण्टः ॥

लवः, पुं, ( लवनमिति। लू + अप्। ) लेशः। ( यथा, रघुः। १६। ६६।
"वक्रेतराग्रैरलकैस्तरुण्य-
श्चूर्णारुणान् वारिलवान् वमन्ति ॥" )
विनाशः। छेदनम्। रामपुत्त्रः। इति मेदिनी। वे, २२॥ अत्र विनाशस्थाने विलासः। इति विश्वः हेमचन्द्रश्च॥ ( रामपुत्त्रस्य जन्मविवरणादिकं रामायणे उत्तरकाण्डतो द्रष्टव्यम् ॥ ) कालभेदः। यथा,—
"अष्टादशनिमेषास्तु काष्ठा काष्ठाद्वयं लवः ॥"
इति हेमचन्द्रः ॥
( यथा, भागवते। १। १८। १३।
"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्त्यानां किमुताशिषः ॥" )
लावानामा पक्षी। इति राजनिर्घण्टः ॥
( किञ्जल्कः। पक्षः। गोपुच्छलोम। इति रघुटीकायां मल्लिनाथधृतवैजयन्ती ॥ यथा, रघुः। १५। ३२।
"स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया।
कविः कुशलवावेव चकार किल नामतः ॥" )

लवङ्गं, क्ली, ( लुनाति श्लेष्मादिकमिति। लू + "नरत्वादिभ्यश्च।" उणा० १। ११६। इति अङ्गच्। ) स्वनामख्यातवणिग्द्रव्यभेदः। तत्पर्य्यायः। देवकुसुमम् २ श्रीसंज्ञम् ३। इत्यमरः ॥ श्रीप्रसूनम् ४। इति भावप्रकाशः ॥ लवङ्गकम् ५। इति शब्दरत्नावली ॥ लवङ्गकलिका ६ दिव्यम् ७ शेखरम् ८ लवम् ९ श्रीपुष्पम् १० रुचिरम् ११ वारिसम्भवम् १३ भृङ्गारम् १४ गीर्व्वाणकुसुमम् १५ चन्दनपुष्पम् १६। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। भुक्तरोचनत्वम्। वातपित्तकफनाशित्वम्। तीक्ष्णत्वम्। मूर्द्धरुजापहत्वञ्च। इति राजनिर्घण्टः ॥ आध्मानानाहशूलघ्नत्वम्। दीपनत्वम्। लघुत्वञ्च। इति राजवल्लभः ॥ अपि च।
"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम्।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ॥
तृष्णां छर्द्दिं तथाध्मानं शूलमाशु विनाशयेत्।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥"
इति भावप्रकाशः ॥
( यथा,—
"विरहानलसन्तप्ता तापिनी कापि कामिनी।
लवङ्गानि समुत्सृज्य पद्दशे राहवे ददौ ॥"
इत्युद्भटः ॥ )

लवङ्गकं, क्ली, ( लवङ्ग + स्वार्थे कन्। ) लवङ्गम्। इति शब्दरत्नावली ॥ ( लवङ्गशब्देऽस्य विवरणं विज्ञेयम् ॥ )

लवङ्गकलिका, स्त्री, लवङ्गम्। इति राजनिर्घण्टः ॥

लवङ्गलता, स्त्री, ( लवङ्गस्य लता। ) पुष्पलताविशेषः। यथा, जयदेवः।
"ललितलवङ्गलतापरिशीलनकोमलमलय-
समीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्ज-
कुटीरे ॥
विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥"
( यथा च।
"अयि ! श्रवङ्ग ! लवङ्गलतालये
पिब मधूनि विधूय मधुव्रतान्।
इह वने हि वनेचरसङ्कुले
नहि सतामसताञ्च विवेचना ॥" )
राधायाः सखीविशेषश्च ॥

लवणं, क्ली, ( लुनाति जाड्यमिति। लू + नन्द्यादित्वात् ल्युः। पृषोदरादित्वात् णत्वम्। ) क्षाररसयुक्तद्रव्यम्। तत्तु पञ्चविधं यथा। सौवर्च्चलम् १ सैन्धवम् २ विटम् ३ औद्भिदम् ४ सामुद्रम् ५। तथा हि।
"सामुद्रं यत्तु लवणमक्षीवं वसिरञ्च तत्।
सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धुजे ॥
रौमकं वसुकं पाक्यं विड्ञ्च कृतके द्वयम् ॥"
सौवर्च्चलेऽक्षरुचके। इत्यमरः ॥ (अस्य विवरणं यथा। "सैन्धवसामुद्रविड्सौवर्च्चलरोमकौद्भिदप्रभृतीनि लवणानि यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्व्वं स्निग्धानि स्वादूनि सृष्टमूत्रपुरीषाणि चेति ॥
"चक्षुष्यं सैन्धवं हृद्यं रुच्यं लघ्वग्निदीपनम्।
स्निग्धं समधुरं वृष्यं शीतं दोषघ्नमुत्तमम् ॥
सामुद्रं मधुरं पाके नात्युष्णमविदाहि च।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम् ॥
सक्षारं दीपनं रूक्षं शूलहृद्रोगनाशनम्।
रोचनं तीक्ष्णमुष्णञ्च विड़ं वातानुलोमनम् ॥
लघुसौवर्च्चलं पाके वीर्य्योष्णं विशदं कटु।
गुल्मशूलविबन्धघ्नं हृद्यं सुरभि रोचनम् ॥
रोमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च।
वातघ्नं लघु विस्यन्दि सूक्ष्मं विड्भेदि मूत्रलम् ॥
लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम्।
सतिक्तं कटु सक्षारं विद्याल्लवणमौद्भिदम् ॥
कफवातक्रिमिहरं लेखनं पित्तकोपनम्।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयम् ॥
ऊषसूतं बालुकैलं शैलमूलाकरोद्भवम्।
लवणं कटुकं छेदि विहितं कटु चोच्यते ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥ *॥
लू + भावे ल्युट्।) छेदनम्। यथा। लवोऽभिलावो लवनं। इति चामरः ( खड्गयुद्धप्रकारविशेषः। यथा, हरिवंशे भविष्यपर्व्वणि। ५३। १७।
"आहितं चित्रकं चित्रं कुन्दवं लवणं धृतम् ॥" )

लवणः, पुं, ( लुनातीति। लू + ल्युः। ) सिन्धुभेदः। ( यथा, महाभारते। ६ । ५। १५।
"लवणेन समुद्रेण समन्तात् परिवारितः ॥" )
राक्षसविशेषः। रसविशेषः। इति मेदिनी। णे, ७४ ॥ (यथा, भागवते। ३। ३१। ७।
"कटुतीक्ष्णोष्णलवणक्षाराम्लादिभिरुल्बणैः।
मातृभुक्तैरुपस्पृष्टः सर्व्वाङ्गोत्थितवेदनः ॥" )
पृथिव्यग्निगुणबाहुल्याल्लवणः। इति चक्रपाणिदत्तकृतद्रव्यगुणोपरि शिवदासीयटीका ॥ तत्पर्य्यायः। पटुः २। तस्य गुणाः।
"लवणो रुचिकृद्वसोऽग्निदायी
पचनः स्वादुकरश्च सारकश्च।
रसितो नितरां जराञ्च पित्तं
शितिमानञ्च ददाति कुष्ठकारी ॥"
इति राजनिर्घण्टः ॥
अपि च।
"लवणः क्लेदनस्तीक्ष्णः पाचनो दीपनः सरः।
स्निग्धो रुचिकरः स्यन्दी दृष्टिशुक्रहरो लघुः ॥"
अन्यच्च।
"लवणः शोधनो रुच्यः पाचनः कफपित्तदः।
पुंस्त्ववातहरः कायशैथिल्यमृदुताकरः।
सोऽतियुक्तोऽक्षिपाकास्रपित्तकुष्ठक्षयापहृत् ॥"
इति राजवल्लभः ॥ * ॥
("लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत्।"
"लवणः स्तम्भसङ्घातबन्धविध्मापनोऽग्निकृत् ॥
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत्।
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम् ॥
तृट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम् ॥"
इति वाग्भटे सूत्रस्थाने दशमेऽध्याये ॥
"लवणो रसः पाचनः क्लेदनः दीपनः च्यावनः छेदनः भेदनस्तीक्ष्णः सरो विकासधःस्रंसवकाशकरो वातहरः स्तम्भबन्धसङ्घातविधमनः सर्व्वरसप्रत्यनीकभूत आस्यं विस्रावयति कफं विस्यन्दयति मार्गान् शोधयति सर्व्वशरीरावयवान् मृदूकरोति रोचयत्याहारमाहारयोगी नात्यर्थंगुरुः स्निग्ध उष्णश्च।
स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमानः पित्तं कोपयति रक्तं वर्द्धयति तर्पयति मूर्च्छ-